MSS No. 182 Subject Religion

Name of MSS स्कंद पुराण : ब्रह्मोत्तर खण्ड शिव कवचम

Author – –

Period Not Available Folios 14

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 7

182

182

शि॰क॰
१

ॐश्रीगणेशायनमः अथशिवकवचलिख्यते भृगुरुवाच कवचंमाहेश्वरंनामदेवैरपिसुदुर्लभम् यःकरोतिसुगात्रेषुश्रुत्वातत्मासभवेन्नरः नशस्त्रैर्नोमराग्नैश्चैवनवज्रशक्तिःपरस्वथा १ प्रभवन्तिरिपोश्चापिपाशाशौथिल्यतांतथा व्याधिग्रहस्तुयःकश्चित्कारयेच्चैवमार्जनम् २ एकादशाकुशैश्चसादैर्मुक्तोभवतिनान्यथाः नभूतानपिशाचाश्चकूष्माण्डा नविनायकः ३ शिवस्मरणमात्रेणनविशंतिकलेवरम् ॐ। नमःपञ्चवक्त्रायशशीसूर्याग्निनेत्रायभस्ममात्रमभितिल

क्रमाद्दाय पठेत् त्राहि मां देव दुःप्रेतेशत्रूणां भयवर्द्धनी स्व
छन्द भैरव प्राच्यामाग्नेय्यां शशिलोचनः भूतेशो दक्षिणे भागे
नैर्ऋत्यां भीमदर्शनः वारुणे वृषकेतुश्च वायव्यां पातु शंक
रः दिग्वासा सोमनो नित्यं ऐशान्यां मदनान्तकः भूतेशो पातु
शिरसो भ्रुवौ भाले सदैवतु भ्रुवोर्मध्ये महातेजाः त्रिनेत्रे नेत्रयो
र्द्वयो पिनाकी नासिके शोकर्णयोगिरिजापते उन्नाक पालिनो
रत्ते मुखदेशमनाभुजाः जिह्वायामधहलन्त्वं सिटंतान् रन्तु मृत्यु
जित् नीलकंठसदाकंठे पृष्ठे कामांगनाशकः त्रिपुरारिस्कंधदे
शो वाहुभ्यां चन्द्रशेखरः हालिचर्मधरो हस्ते नत्यां गुलितलःस

शि॰क॰
२

दा भवानीश्रोमेहृदयंपातुवाहूदरकटिंमृगाः गुह्येलिंगेचमेढ्रेच
नाभौचप्रमथाधिपः जंघौचचरणौभीमः सर्वांगेकेशवप्रियाः
रोमकूपेविपातुः शङ्खस्पर्शोपयोगवित् रक्तमज्जावसामांस।
शुक्रेश्वरगणाधिपा प्राणापानसमानेषुव्यानोदानेषुपूजेदी
रताहीनेनुयत्स्थानंवर्जितंकवचेनतु तत्सर्वंरक्षमेदेवव्याधि
दुर्गोज्वरादिमाः कार्याकुर्यादिमंप्राप्तोदीपंप्रज्वाल्यसर्पिषा
त्रिवेघशीरिवनेत्रायधारयेज्ज्ञोत्तरंमुखं ज्वरदाहपरिक्रान्तं।
तथान्याव्याधिसंयुतं कुशैःसंमार्ज्यसंमार्ज्यतपेदीपशिखं
ज्वरं एकाहकंद्वितीयंचतृतीयंचचतुर्थिकम् वातपित्तसमु

भूतं सत्वपातोग्नितेजसां ग्रन्थेदिव्युड्रायधैः कर्मजं वाभिचा
रिकं धातुस्थं कफहेमसिद्ध्रविषमेकामसंभवम् भूतानाभिषंग
तेसर्गासंस्थित्वापयतास्थिनः शीवाहत्याचाहमंत्रेणएवं
हृतिंस्वयंस्मरन् त्यजदेहंमनुष्यस्यदीपंगच्छमहाज्वर हे
त्वावकवचंदेवं सर्वव्याधिविभेदनं नवाधयतिव्याधयाल
सवालग्रहभयश्च ये लूताविस्फोटनंचोरंशीतोर्निच्छेदवि
ग्रहं कामलालयकामंचगुल्मसारभगंदरः अपस्मारोन्मादंचग्रह
डोगंस्त्रोपुंयाणिचविंदति भ्रतिसारादयोयोगः डाकिनीग्र
हपीडिता पापाविचर्चिकादद्रूदशव्याधिदशार्दिनः स्मरणा

त्राशयत्याशुकवचं शूलपाणिनः यस्तुस्मरंतिनित्यं वै यस्तुधा

रयते नरः समुक्तासर्वपापेभ्योवसेच्छीवपुरेचिरं संत्याव्रतस्य

यज्ञस्यदानस्यापिहि शास्तृनः नसेलाविद्यते शंभोकवचस्म

रनोयतः तस्मात्माहेश्वरं कवचं सर्वव्याधिनिसूदनं यः करो

तिनरोनित्यं सत्वजेच्छुंकरं पदम् इतिश्रीरुद्रयामलेतंत्रेगो

रीभैरवसंवादेशिवकवचं संपूर्णम् ॐश्रीगणेशायनमः

अथभैरवअष्टोत्तरशतनामलिख्यते अस्यश्रीआपदुद्धार

वटुकभैरवस्तोत्रस्य बृहदारण्यकऋषिरनुष्टुप्छंदः श्रीवटुक

भैरवोदेवता ह्रींबीजं वटुकायेतिशक्तिः प्रणवः कीलकं ममाभी

ष्टसिद्ध्यर्थे जपे विनियोगः ॐ ह्रां वां अंगुष्ठाभ्यां नमः ॐ ह्रीं वीं
तर्जनीभ्यां नमः ॐ ह्रूं वूं मध्यमाभ्यां नमः ॐ ह्रैं वैं अनामिका
भ्यां नमः हृदयादिन्यासाः यथा ॐ ह्रां वां हृदयाय नमः ॐ ह्रीं
वीं शिरसे स्वाहा ॐ ह्रूं वूं शिखायै वौषट् ॐ ह्रैं वैं कवचाय हुं ॐ
ह्रौं वौं नेत्रत्रयाय वौषट् ॐ ह्रः वः अस्त्राय फट् अथ ध्यान
म् वन्दे बालस्फटिकसदृशं कुंतलोल्लासिवक्त्रं दिव्याकल्पैर्न
वमणिमयैः किंकणीनूपुराढ्यं दीप्ताकारं विशदवसनं सुप्र
सन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदंडौ दधानम् १
उद्यद्भास्वत्समाभं त्रिनयनं रक्तांगरागस्रजं स्मेरास्यं वरदंक

व॰ भै॰
४

पालस्य जयं स्थलं दयानं वौ नीलं नीलद्रुदंष्ट्र ... णगुणं दी-
नां सुत्रूभेज्वलं नेपूकाकणातासंभयूलं देउमद्राभावयेत्
२ ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुंडमालं महेशं दि-
गवस्त्रं पिंगकेशं डमरुमथसृणिं खड्गशूलाभयानि नागं घंटां
कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं म-
णिमयविलसत्किंकिणीनूपुराढ्यं ३ इति सात्त्विकराजसता-
मसध्यानम् अथ मूलमंत्रः ॐ ह्रीं बटुकाय आपदुद्धारणा-
य कुरु कुरु बटुकाय ह्रीं इति मंत्रेण जपं कारयेत् ॐ भैरवो
भूतनाथश्च भूतात्मा भूतभावनः क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्र

दः लक्ष्मियोविराट १ श्मशानवासीमांसाशीखर्पराशीस्मरान्त
कत् २ रक्तपः पाणपः सिद्धः सिद्धिदः सिद्धसेवितः २ कंकालः
कालविश्रमानः कलीकाष्ठानतुः कविः त्रिनेत्रोबहुनेत्रश्चतथा
पिंगललोचनः ३ शूलपाणिः खड्गपाणिः कंकालीधूम्रलोच
नः भीरुर्भैरवीनाथोभूतयोयोगिनीपतिः ४ धनदोधनहारी
चधनवान्प्रतिभानुमान् नागहारोनागकेशोव्योमकेशः कपाल
भृत् ५ कालः कपालमालीचकमनीयः कलानिधिः त्रिलोच
नोज्वलन्नेत्रस्त्रिशिखीचत्रिलोचनः ६ त्रिनेत्रतनयोडिंभः शांतः
शान्तजनप्रिय वटुकोवटुकेशश्चखट्वांगवरधारकः ७ भूता

ध्यक्षःपशुपतिर्भिक्षुकःपरिचारकः७ धूर्तोदिगम्बरःशौरिर्हरिणः
पाण्डुलोचनः ८ प्रशान्तःशान्तिदःशुद्धःशङ्करप्रियबान्धवः अष्ट
मूर्त्तिर्निधीशश्चज्ञानचक्षुस्तपोमयः ९ अष्टाधारःसर्पयुक्तःष
डाधारःशिखीसखः भूधरोभूधराधीशोभूपतिर्भूधरात्मजः १०
कंकालधारीमुंडीचनागयज्ञोपवीतिकः जृंभणोमोहनःस्तंभीमा
रणःक्षोभणस्तथा ११ शुद्धोनीलांजनप्रख्योदैत्यहामुंडभूषितः ब
लिभुग्बलिभुङ्नाथोबालोबालपराक्रमः १२ सर्वापत्तारणोदुर्गो
दुष्टभूतनिषेवितः कामीकलानिधिःकान्तःकामिनीवशकृद्वशी
१३ सर्वसिद्धिप्रदोवैद्यःप्रभुर्विष्णुरितीवहि अष्टोत्तरशतंनाम्नां

भैरवस्य महात्मनो १४ मयाते कथितं सर्वरहस्यं सर्वकामदं यइदंप
ठति स्तोत्रं नामाष्टशतमुत्तमं १५ न शत्रुतो भयं चैव प्राप्नुयान्मानवः
क्वचित् पातकानां भयं चैव पठेत्स्तोत्रमनुत्तमम् १६ मारीभये राज
भये तथा चौराग्निजे भये अन्यांतिके महाघोरे तथा दुस्वप्नजे भये १७
बंधने च तथा घोरे पठेत्स्तोत्रमनन्यधीः सर्वं प्रशममायाति भयं भै
रवकीर्त्तनात् १८ एकादशसहस्रं तु पुरश्चरणमुच्यते यस्त्रिसंध्यं प
ठेन्नित्यं संवत्सरमतंद्रितः १९ स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मान
वः षण्मासान् भूमिकामस्तु जपित्वा भू प्राप्नुयान्महीं २० राजशत्रुवि
नाशार्थं जपेन्मासाष्टकं यदि रात्रौ वारत्रयं देवि [illegible] मासा [illegible] त्र

व.भै. वान् २१ जयेत्स्मासत्रयंमर्त्यो [illegible] र्दी
६ दारार्थीयस्तुमानवः २२ जपेन्मासत्रयेदेविवारमेकंतथानिशी थ
ंपुत्रार्थीलभ्यादारान् आप्नुयान्नात्रसंशयः २३ रोगीरोगात्प्रमुच्येत
बन्धोमुच्येतवन्धनात् भीतोभयात्प्रमुच्येतदेविसत्यंनसंशयः
प: २४ निगडैश्चापिबद्धाकारागृहनिपातितः शृंखलाबंधनेप्राप्तः
पठेच्चैवदिवानिशि २५ यान्यान्समीहतेकामांस्तांस्तान्प्राप्नोत्य
संशयः अप्रकाश्यंपरंगुह्यंनदेयंयस्यकस्यचित् २६ सुकुलीना
यशान्तायऋजवेदंभवर्जिने दद्यात्स्तोत्रमिदंपुण्यंसर्वकामफ
लप्रदम् २७ भैरवोपिजाहृष्टोभूत्स्वयंचैवमहेश्वरः एवंस्तुत्वात

नेमकीलकमीश्वरी सर्वार्थसाधनोद्देविविनियोगः श्रकीर्त्तितः ॐअ

स्यश्रीवज्रपंजरकवचस्यब्रह्माऋषिः गायत्रीछंदः ह्रींवीजं शारद

क्तिः नमः कीलकं सर्वार्थसाधनेकवचपाठेविनियोगः अंआं इंईशि

रः पातु श्रीसूर्योमेत्रविग्रहः उं ऊं ऋं ॠं ललाटे मह्रींरविः पातुचिंम

या लृं लॄं एं ऐं पातुनेत्रेह्रींसमाहणसारथिः ॐ औं अं अः श्रुतीपातुस

र्वजगदीश्वरः कंखंगंघंपातुगंडौ सूर्यः सरसिजितः चंछंजंझंव

नासामेपातुमामर्यमाप्रभुः टंठंडंढंमुखंपायाद्योगीश्वरसुजितः

तंथंदंधंगलंपातुनंनारायणवल्लभः पंफंवंभंमम स्कंधौपातुमंस

हमांनिधिः यंरंलंवंभुजौपातु [illegible] भुजः लंसं [illegible] पातु

सू॰ व॰
पं॰ क॰
८

ग्रहनाशो दिनेश्वरः ऊँ जं गां नं मं मे पातु पृष्ठं दिवसनायकः अं आं इं ईं
उं ऊं ऋं ॠं नाभिं पातु तमोपहः लृं ॡं एं ऐं ओं औं अं अः लिंगं मे व्याद्ग्रहे
श्वरः कं खं गं घं ङं चं छं जं झं कटिं भानुर्ममावतु पं फं बं भं यं रं लं वं जं
घे मे व्याद्दिवाकरः शं षं सं हं लं तं पातु मूलं पातु त्रयीतनुः ऊँ जं गां न
मं मे पातु सविता सकलं वपुः सोमः पूर्वे च मां पातु भौमोऽग्नेः मां सदाव
तु बुधो [illegible] ऐ पातु नैरृत्यां गुरुदेव सदा पश्चिमे मां सितः पातु वा
यव्यां मां शनैश्चरः उत्तरे मां तमः पातु ईशान्यां मां शिखी तथा ऊर्ध्वं
मां पातु मिहिरो माम् अधस्ताज्जगत्पतिः प्रभाते भास्करः पातु मध्याह्ने मां
दिनेश्वरः सायं वेदप्रियः पातु निशीथे विस्फुरावति सर्वत्र सर्वदा सू

री: पातु मां चक्रनायकः रणे राजकुले द्यूते विवादे शत्रुसंकटे संग्रा
मे चतुरो रोगे पातु मां सविता प्रभुः ॐ ॐ ॐ ॐ ॐ उ ह्र समयात् सू
र्यो वतात् मां भयाद् ह्रां ह्रीं सः ह ह ह्रां ह्रू सो ह स ह सो हं सो वतात् सर्वतः
स सः सः स स स नृपाद् वनचरात् चौरात् रणात् संकटात् याद् मां कुल
नायको ऽपि सविता ॐ ह्रीं ह्रौं सर्वदा ह्रां ह्रीं हुं दधतं तन यावतःस्मरणि
भीभे भयाद् ह्रां त्करो रां रीं रूं रूं रवि जंर भयात् कुरात् स्मरात् मयात्
ग्रं ग्रां ग्रं विविंवी महाभयभयं मां पातु मार्तण्डको ऽमलं व्याप्नतु स
दावतु परं हं सः सह सो ऽस्तु मां नू इति श्रीकवचं दिव्यं वज्रपंजरकाभि
दम् सर्वदेवरहस्यं च मातृकामंत्रवेष्टितं महारोगभयघ्नं पापघ्नं स

स॰व॰
पं॰कं॰
९

न्मुखोदितं गुह्यं यशस्कं पुण्यं सर्वश्रेयस्करं शिवे लिखित्वा धारयेत्तु
तिथ्ये वा जन्मभे प्रिये मृगांके न रिक्तेन सुधालीरेणा पार्वति मार्दलीरे
णापुण्येन भूर्जे त्वचमहेश्वरि कनकीका पुले विन्यासकवचं धारये
दये श्वेतगर्वेणार क्तेन श्यामेनाद्वेषु पेन्मटीं सौवर्णेनाथ सर्वे स्वधा
रयेत्स्मार्थी वा भुजे रणेरिपुंजयेद्देविवादी स्वदृशिजेष्यति राज्ञमान्यो
भवेन्नित्यं सर्वतेजोमयो भवेत् कंठस्था पुत्रदा देवि कुक्षिस्था रोगनाश
िनी शिरः गुटिकादिव्या राजलोकवशंकरी भुजस्थायनदा नि
त्यं तेजोवृद्धिविवर्द्धिनी वंध्या वा काकवंध्या वा मृतवत्सा च या नना॥
कंठे सा धारयेन्नित्यं बहुपुत्रा प्रजायते यस्य देहे भवेन्नित्यं गुटिकैषा

स०व०
पं०क०
१८

महेश्वरि महास्त्राणि गिरिमुक्तानि ब्रह्मलादीनि पर्वतानि ते देहं प्राप्य
व्यक्तानि भविष्यन्ति न संशयः त्रिकालं यः पठेन्नित्यं कवचं वज्रपं
जरं तस्य सद्यो महादेवि सविता वरदो भवेत् अज्ञात्वा कवचं देवि य
जयेद्यस्त्रयीतनुं तस्य प्रजाविनं पुण्यं जन्मकोटिषु निष्फलम् द
शावर्त्तं पठेत्तं वत्ससप्तम्यां रविवासरे महाकुष्ठार्दितो देवि मुच्यते
तेनात्र संशयः नीरोगो यः पठेद्धर्मं दरिद्रो वज्रपंजरं लक्ष्मीवान्
जायते देवि सद्यः सूर्यप्रसादतः भक्त्या यः पठते देवि कवचं प्रत्य
हं प्रिये इहलोके श्रियं भुक्त्वा देहान्ते मुक्तिमाप्नुयात् ॥ इति श्री
सूर्यवज्रपंजरकवचं समाप्तम् ॥ शुभं भूयात्...

१८

शी·क·
१०

ॐ नमः शिवाय ॥ ॐ अस्य श्रीसदाशिवकवचस्तोत्रमंत्रस्य ब्रह्मा ऋषि
रनुष्टुप्छंदः श्रीसदाशिवो देवता रं बीजं ह्रीं शक्तिः श्रीसदाशि
व सदाशिवप्रीत्यर्थे शिवकवचस्तोत्रमंत्रपाठे विनियोगः ॐ अंगु
ष्ठाभ्यां नमः नं तर्जनीभ्यां नमः मः मध्यमाभ्यां नमः शिं अनामिका
भ्यां नमः वां कनिष्ठिकाभ्यां नमः यः करतलकरपृष्ठाभ्यां नमः ॐ
हृदयाय नमः नं शिरसे स्वाहा मः शिखायै वौषट् शिं कवचाय हुं
वां नेत्रत्रयाय वौषट् यः अस्त्राय फट् अथ ध्यानम् क्षीरफेनध
वलं रजताद्रिसमप्रभं चारुचंद्रकलाराजज्जटामुकटमंडितं पंचवक्त्रा
धरं शंभुं प्रतिवक्त्रं त्रिलोचनं शार्दूलचर्मवसनं रत्नाभरणभूषितं र

१०

र्द्धहस्तेपरशुंवरंचवरदंयःकरे वामोर्द्धहस्तेहरिणंदधानमभयंकरे
सुप्रसन्नमुखांभोजंत्रिविष्टंचप्रविष्टरे ब्रह्मविष्णुमहेशाद्यैर्नुतंभ
क्त्यासुरासुरैः विश्वाद्यंविश्ववपुषंभवभीतिहरंविभुं ऋषभउवा
च नमस्कृत्यमहादेवंविश्वव्यापिनमीश्वरं १ सुखोद्देशेसमासीनो
यथावत्कल्पितासनः जितेंद्रियोजितप्राणोश्चिंतयेत्शिवमव्य
यम् हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसाव्याप्तनभोवकाशं अती
द्रियंसूक्ष्ममनंतमाद्यंध्यायेत्परानंदमयंमहेशं ३ ध्यानात[illegible]
र्विलकर्मवन्धश्चिरंचिदानंदनिमग्नचेता षडक्षरन्यासस[illegible]
त्माशैवेनकुर्यात्कवचेनरक्षां [illegible]यांप्राहदेवोखिलदेव[illegible]दत्ता।

श्री·क·

११

रक्षूपेवतिनंगभीरे तन्नामदिव्यं वरमंत्रमूलं धुनोतु मे सर्वमसं[illegible]

ख्यं ५ सर्वत्रमांरक्षतु विश्वमूर्त्तिर्ज्योतिर्मयानंदघनश्चिदात्मा ॥ अणो

रणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ६ योभूस्वरूपे

ण बिभर्त्ति विश्वं पायात्स भूमेर्गिरिशोष्टमूर्त्तिः योपांस्वरूपेण नृ

णां करोति संजीवनं सोवतु मां जलेभ्यः ७ कल्पावसाने भुवनानि

दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः स कालरुद्रोवतु मां दवाग्नेः

वात्यादिभीतेरखिलार्त्तितापात् ८ प्रदीप्तविद्युत्कनकावभासो वि

द्यावराभीतिकुठारपाणिश्चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां दिशो

रक्षतु मामजस्रं ९ कुठारवेदांकुशपाशशूलकपालढक्काक्षगु

णन्यासः चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्यां
१० कुंदेंदुशंखस्फुटिकावभासो वेदाक्षमालावरदाभयांकः त्र्यक्ष
श्चतुर्वक्त्र उरुप्रभासो सद्योभिजातोवतु मां प्रतीच्यां ११ वराक्षमाला
भयटंकहस्तः सरोजकिंजल्कसमानवर्णः त्रिलोचनो चारुचतुर्मु
खो मां पायादुदीच्यां दिशि वामदेवः १२ वेदाभयेष्टांकुशपाशटंककपा
लढक्काक्षत्रिशूलपाणिः सितद्युतिः पंचमुखोवतान्मामीशानऊ
र्ध्वपरमप्रकाशः १३ मूर्धानमव्यान्मम चंद्रमौलिर्भालं ममाव्यादथ
भालनेत्रः नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्व
नाथः १४ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपा

श्री·क·
१२

ली वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु देवजिह्वा १५ कंठं गिरी
शोवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणी दोर्मूलमव्यात्सम
धर्मबाहुर्वक्षस्थलं दक्षमखांतकोव्यात् १६ ममोदरं पातु गिरींद्रध
न्वा मध्यं ममाव्यात् मदनांतकारी हेरंबतातो मम पातु नाभिं पाया
त्कटिं धूर्जटिरीश्वरो मे १७ ऊरुद्वयं पातु कुबेरमित्रो जंघाद्वयं पुंग
वकेतुरव्यात् जानुद्वयं मे जगदीश्वरोव्यात् पादौ ममाव्यात्सुरवंद्य
पादः १८ महेश्वरः पातु दिनादियामे मां मध्ययामेवतु वामदेवः
त्र्यंबकः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे १९ पाया
न्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे गौरीपतिः पातु

१२

निशावसाने मृत्युंजयो रक्षतु सर्वकाले २० अंतःस्थितं रक्षतु शंकरो मां
स्थाणुः सदा पातु बहिःस्थितं मां तदंतरे पातु पतिः पशूनां सदाशिवो र
क्षतु मां समंतात् २१ तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतं प्रमथाधि
नाथः वेदांतवेद्योवतु मां निषण्णं मामव्ययः पातु शिवः शयानं २२
मार्गेषु मां रक्षतु नीलकंठः शैलादिमार्गेषु पुरत्रयारिः अरण्यवा
सादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः २३ कल्पांतकालो
ग्रपटुः प्रकोपः स्फुटाट्टहासोच्छलितांडकोशः घोरारिसेनार्णवदुर्नि
वारः महाभयाद्रक्षतु वीरभद्रः २४ पत्त्यश्वमातंगघटावरूथसहस्र
लक्षायुतकोटिभीषणं अक्षौहिणीनां शतमाततायिनां छिंद्यान्मृडो घो

रकुठारधाया: २५ निहंतु शत्रून् स्खलयान नकार्विजलं वि... नं
स्य शार्दूलसिंहार्तिहृकादिहिंस्रान् सन्नाशयत्वी... यनाक: २६
उं शाकुनदुःस्वप्नदुर्गतिदौर्मनस्यं दुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि
उत्पातविघ्नभीतमहाग्रहार्तिव्याधिश्च नाशयतु मे जगतामधीशः
२७ ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सकलतत्त्ववि
दूराय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकहर्त्रे
सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय
सकललोकैकवरप्रदाय सकलदुरितार्तिभंजनाय सकलजगदभयंक
राय सकललोकैकशंकराय शशांकशेखराय शाश्वतनिजाभासा

यनिर्गुणायनिरूपमायनिराभासायनिरामयायनिष्प्रपंचायनिष्क
लंकायनिर्द्वंद्वायनिःसंगायनिर्मलायनिर्गमायनिरूपमायविभ
वायनिरंजनकायनिराधारायनित्यशुद्धपरिपूर्णसच्चिदानंदाद्वया
यपरमशांतप्रकाशतेजोमयायतेजोरूपाय जयजयजयमहा
रुद्ररौद्रभद्रावतारमहाभैरवकपालभैरवकमालमालाधरखट्वा
ङ्गखड्गचर्मपाशांकुशडमरुशूलचापबाणगदाशक्तिभिंदिपा
लतोमरमुद्गरमुसलपाशपट्टिशपरशुभुशुंडिशतघ्नीचक्रायुध
भीषणकरसहस्रदंष्ट्राकरालविकटाटविस्फारितब्रह्मांडमंड
लनागेंद्रकुंडलनागेंद्रहारनागेंद्रवलयनागेंद्र[illegible]

शि·क·
१८

त्युंजयत्र्यंबकत्रिपुरांतकत्रिकालकालाग्निरुद्रनीलकंठविरू
पाक्षविश्वेश्वरविश्वरूप वृषभध्वजवृषभवाहनविषभूषणविश्व
तोमुखसर्वतोरक्षरक्षमां प्रज्वलप्रज्वलप्रज्वलमहादेवमृत्युभ
यंनाशयनाशयरोगभयमुत्सादयोत्सादसादय विषसर्पभयं
नाशयनाशय चोरान्मारयमारय ममशत्रूनुच्चाटयोच्चाटयत्रि
शूलेनविदारयविदारयकुठारेणभिंदिभिंदि खड्गेनछिंदिछिंदि
खट्वांगेनविपोथयविपोथयमुशलेननिष्पेषयनिष्पेषयबाणैः
संताडयसंताडय तृतीयनेत्रेणभस्मनापयसनापयरक्षांसिभीषय
भीषयभूतानिविद्रावयविद्रावय कूष्मांडवेतालमारीगणब्रह्मरा १८

त्रसान्संत्रासयसंत्रासय मामभयंकुरुकुरु वित्रस्तंमामाश्वासयाश्वास
य नरकभयादुद्धर संजीवयसंजीवय क्षुत्तृड्भ्यांमामाप्यायाप्यायय दुः
खातुरंमामानंदयानंदय शिवकवचेनमामाच्छादयाच्छादय त्र्यंबक ।
नमस्तेनमस्तेनमस्ते इत्येतत्कवचंशैवंवरदंव्याहृतंमया सर्वबाधा
प्रशमनंरहस्यंसर्वदेहिनां यःसदाधारयेन्मर्त्यःशैवंकवचमुत्तमं ।
नतस्यजायतेक्वापिभयंशंभोरनुग्रहात् २ क्षीणायुर्मृत्युमापन्नोमहा
रोगहतोपिवा सद्यःसुखमवाप्नोतिदीर्घमायुश्चविंदति ३ सर्वदारि
द्र्यशमनंसौमंगल्यविवर्द्धनं योधत्तेकवचंशैवंसदेवैरपिपूज्यते
महापातकसंघातैर्मुच्यतेचोपपातकैः देहांतेमुक्तिमाप्नोतिशिववर्मा

शि॰क॰ नुभावतः ५ त्वमपिश्रद्धयावत्सपूर्वंकवचमुत्तमं धारयस्वमया
१५ दत्तंसद्यःश्रेयोह्यवाप्स्यसि ६ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडे
शिवकवचंसमाप्तम् ॥ ॥ ॥

१५